# Gayatri Samhita

# ગાયત્રી સંહિતા

## Document Information

Text title : Gayatri Samhita

File name : gAyatrI_saMhitA.itx

Category : devii, gAyatrI, stotra, devI, saMhitA

Location : doc_devii

Author : Traditional

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Source : Gayatri Mahavijnana -

Latest update : Mar. 14, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 26, 2024

*sanskritdocuments.org*

# ગાયત્રી સંહિતા

આદિ શક્તિરિતિ વિષ્ણોસ્તામહં પ્રણમામિ હિ ।
સર્ગઃ સ્થિતિર્વિનાશશ્ચ જાયન્તે જગતોઽનયા ॥ ૧॥

નાભિ-પદ્મ-ભુવા વિષ્ણોર્બ્રહ્મણા નિર્મિતં જગત્ ।
સ્થાવરં જઙ્ગમં શક્ત્યા ગાયત્ર્યા એવ વૈ ધ્રુવમ્ ॥ ૨॥

ચન્દ્રશેખર કેશેભ્યો નિર્ગતા હિ સુરાપગા ।
ભગીરથં તતારૈવ પરિવારસમં યથા ॥ ૩॥

જગદ્ધાત્રી સમુદ્ભૂય યા હૃન્માનસરોવરે ।
ગાયત્રી સકુલં પારં તથા નયતિ સાધકમ્ ॥ ૪॥

સાસ્તિ ગઙ્ગૈવ જ્ઞાનાખ્યસુનીરેણ સમાકુલા ।
જ્ઞાન ગઙ્ગા તુ તાં ભક્ત્યા વારં-વારં નમામ્યહમ્ ॥ ૫॥

ઋષયો વેદ-શાસ્ત્રાણિ સર્વે ચૈવ મહર્ષયઃ ।
શ્રદ્ધયા હૃદિ ગાયત્રીં ધારયન્તિ સ્તુવન્તિ ચ ॥ ૬॥

હ્રીં શ્રીં ક્લીં ચેતિ રૂપૈસ્તુ ત્રિભિર્વા લોકપાલિની ।
ભાસતે સતતં લોકે ગાયત્રી ત્રિગુણાત્મિકા ॥ ૭॥

ગાયત્ર્યૈવ મતા માતા વેદાનાં શાસ્ત્રસમ્પદામ્ ।
ચત્વારોઽપિ સમુત્પન્ના વેદાસ્તસ્યા અસંશયમ્ ॥ ૮॥

પરમાત્મનસ્તુ યા લોકે બ્રહ્મ શક્તિર્વિરાજતે ।
સૂક્ષ્મા ચ સાત્ત્વિકી ચૈવ ગાયત્રીત્યભિધીયતે ॥ ૯॥

પ્રભાવાદેવ ગાયત્ર્યા ભૂતાનામભિજાયતે ।
અન્તઃકરણેષુ દેવાનાં તત્ત્વાનાં હિ સમુદ્ભવઃ ॥ ૧૦॥

ગાયત્ર્યુપાસનાકરણાદાત્મશક્તિર્વિવર્ધતે ।
પ્રાપ્યતે ક્રમશોઽજસ્ય સામીપ્યં પરમાત્મનઃ ॥ ૧૧॥

શૌચં શાન્તિર્વિવેકશ્ચૈતલ્લાભ ત્રયમાત્મિકમ્ ।
પશ્ચાદવાપ્યતે નૂનં સુસ્થિરં તદુપાસકમ્ ॥ ૧૨॥

કાર્યેષુ સાહસઃ સ્થૈર્યં કર્મનિષ્ઠા તથૈવ ચ ।
એતે લાભાશ્ચ વૈ તસ્માજ્જાયન્તે માનસાસ્ત્રયઃ ॥ ૧૩॥

પુષ્કલં ધન-સંસિદ્ધિઃ સહયોગશ્ચ સર્વતઃ ।
સ્વાસ્થ્યં વા ત્રય એતે સ્યુસ્તસ્માલ્લાભાશ્ચ લૌકિકાઃ ॥ ૧૪॥

કાઠિન્યં વિવિધં ઘોરં હ્યાપદાં સંહતિસ્તથા ।
શીઘ્રં વિનાશતાં યાન્તિ વિવિધા વિઘ્નરાશયઃ ॥ ૧૫॥

વિનાશાદુક્ત શત્રૂણામન્તઃ શક્તિર્વિવર્ધતે ।
સંકટાનામનાયાસં પારં યાતિ તયા નરઃ ॥ ૧૬॥

ગાયત્ર્યુપાસકસ્વાન્તે સત્કામા ઉદ્ભવન્તિ હિ ।
તત્પૂર્તયેઽભિજાયન્તે સહજં સાધનાન્યપિ ॥ ૧૭॥

ત્રુટયઃ સર્વથા દોષા વિઘ્ના યાન્તિ યદાન્તતામ્ ।
માનવો નિર્ભયં યાતિ પૂર્ણોન્નતિ પથં તદા ॥ ૧૮॥

બાહ્યંચાભ્યન્તરં ત્વસ્ય નિત્યં સન્માર્ગગામિનઃ ।
ઉન્નતેરુભયં દ્વારં યાત્યુન્મુક્તકપાટતામ્ ॥ ૧૯॥

અતઃ સ્વસ્થેન ચિત્તેન શ્રદ્ધયા નિષ્ઠયા તથા ।
કર્તવ્યાવિરતં કાલે ગાયત્ર્યાઃ સમુપાસના ॥ ૨૦॥

દયાલુઃ શક્તિ સમ્પન્ના માતા બુદ્ધિમતી યથા ।
કલ્યાણં કુરુતે હ્યેવ પ્રેમ્ણા બાલસ્ય ચાત્મનઃ ॥ ૨૧॥

તથૈવ માતા લોકાનાં ગાયત્રી ભક્તવત્સલા ।
વિદધાતિ હિતં નિત્યં ભક્તાનાં ધ્રુવમાત્મનઃ ॥ ૨૨॥

કુર્વન્નપિ ત્રુટીર્લોકે બાલકો માતરં પ્રતિ ।
યથા ભવતિ કશ્ચિન્ન તસ્યા અપ્રીતિભાજનઃ ॥ ૨૩॥

કુર્વન્નપિ ત્રુટીર્ભક્તઃ ક્વચિત્ ગાયત્ર્યુપાસને ।
ન તથા ફલમાપ્નોતિ વિપરીતં કદાચન ॥ ૨૪॥

અક્ષરાણાં તુ ગાયત્ર્યા ગુમ્ફનં હ્યસ્તિ તદ્વિધમ્ ।
ભવન્તિ જાગૃતા યેન સર્વા ગુહ્યાસ્તુ ગ્રન્થયઃ ॥ ૨૫॥

જાગૃતા ગ્રન્થયસ્ત્વેતાઃ સૂક્ષ્માઃ સાધકમાનસે ।
દિવ્યશક્તિસમુદ્ભૂતિં ક્ષિપ્રં કુર્વન્ત્યસંશયમ્ ॥ ૨૬॥

જનયન્તિ કૃતે પુંસામેતા વૈ દિવ્યશક્તયઃ ।
વિવિધાન્ વૈ પરિણામાન્ ભવ્યાન્ મઙ્ગલપૂરિતાન્ ॥ ૨૭॥

મન્ત્રસ્યોચ્ચારણં કાર્યં શુદ્ધમેવાપ્રમાદતઃ ।
તદશક્તો જપેન્નિત્યં સપ્રણવાસ્તુ વ્યાહૃતીઃ ॥ ૨૮॥

ઓમિતિ પ્રણવઃ પૂર્વં ભૂર્ભુવઃ સ્વસ્તદુત્તરમ્ ।
એષોક્તા લઘુ ગાયત્રી વિદ્વદ્ભિર્વેદપણ્ડિતૈઃ ॥ ૨૯॥

શુદ્ધં પરિધાનમાધાય શુદ્ધે વૈ વાયુમણ્ડલે ।
શુદ્ધ દેહમનોભ્યાં વૈ કાર્યા ગાયત્ર્યુપાસના ॥ ૩૦॥

દીક્ષામાદાય ગાયત્ર્યા બ્રહ્મનિષ્ઠાગ્રજન્મના ।
આરભ્યતાં તતઃ સમ્યગ્વિધિનોપાસના સતા ॥ ૩૧॥

ગાયત્ર્યુપાસનામુક્ત્વા નિત્યાવશ્યકકર્મસુ ।
ઉક્તસ્તત્ર દ્વિજાતીનાં નાનધ્યાયો વિચક્ષણૈઃ ॥ ૩૨॥

આરાધયન્તિ ગાયત્રીં ન નિત્યં યે દ્વિજન્મનઃ ।
જાયન્તે હિ સ્વકર્મભ્યસ્તે ચ્યુતા નાત્ર સંશયઃ ॥ ૩૩॥

શૂદ્રાસ્તુ જન્મના સર્વે પશ્ચાદ્યાન્તિ દ્વિજન્મતામ્ ।
ગાયત્ર્યૈવ જનાઃ સાકં હ્યુપવીતસ્ય ધારણાત્ ॥ ૩૪॥

ઉચ્ચતા પતિતાનાં ચ પાપિનાં પાપનાશનમ્ ।
જાયેતે કૃપયૈવાસ્યાઃ વેદમાતુરનન્તયા ॥ ૩૫॥

ગાયત્ર્યા યા યુતા સન્ધ્યા બ્રહ્મસન્ધ્યા તુ સા મતા ।
કીર્તિતં સર્વતઃ શ્રેષ્ઠં તસ્યાનુષ્ઠાનમાગમૈઃ ॥ ૩૬॥

આચમનં શિખાબન્ધઃ પ્રાણાયામોઽઘમર્ષણમ્ ।
ન્યાસશ્ચોપાસનાયાં તુ પઞ્ચ કોષા મતા બુધૈઃ ॥ ૩૭॥

ધ્યાનતસ્તુ તતઃ પશ્ચાત્ સાવધાનેન ચેતસા ।
જપ્યા સતતં તુલસી માલયા ચ મુહુર્મુહુઃ ॥ ૩૮॥

એક વારં પ્રતિદિનં ન્યૂનતો ન્યૂનસઙ્ખ્યકમ્ ।

ધીમાન્મન્ત્ર શતં નૂનં નિત્યમષ્ટોત્તરં જપેત્ ॥ ૩૯॥

બ્રાહ્મે મુહૂર્તે પ્રાઙ્મુખો મેરુદણ્ડં પ્રતન્ય હિ ।
પદ્માસનં સમાસીનઃ સન્ધ્યાવન્દનમાચરેત્ ॥ ૪૦॥

દૈન્યરુક્ શોક ચિન્તાનાં વિરોધાક્રમણાપદામ્ ।
કાર્યં ગાયત્ર્યનુષ્ઠાનં ભયાનં વારણાય ચ ॥ ૪૧॥

જાયતે સા સ્થિતિરસ્માન્મનોઽભિલાષયાન્વિતા ।
યતઃ સર્વેઽભિજાયન્તે યથા કાલં હિ પૂર્ણતામ્ ॥ ૪૨॥

અનુષ્ઠાનાત્તુ વૈ તસ્માદ્ગુપ્તાધ્યાત્મિક-શક્તયઃ ।
ચમત્કારમયા લોકે પ્રાપ્યન્તેઽનેકધા બુધૈઃ ॥ ૪૩॥

સપાદલક્ષમન્ત્રાણાં ગાયત્ર્યા જપનં તુ વૈ ।
ધ્યાનેન વિધિના ચૈવ હ્યનુષ્ઠાનં પ્રચક્ષતે ॥ ૪૪ ।
પઞ્ચમ્યાં પૂર્ણિમાયાં વા ચૈકાદશ્યાં તથૈવ હિ ।
અનુષ્ઠાનસ્ય કર્તવ્યં આરમ્ભઃ ફલ-પ્રાપ્તયે ॥ ૪૫॥

માસદ્વયેઽવિરામં તુ ચત્વારિંષટ્ દિનેષુ વા ।
પૂરયેત્તદનુષ્ઠાનં તુલ્યસઙ્ખ્યાસુ વૈ જપન્ ॥ ૪૬॥

તસ્યાઃ પ્રતિમાં સુસંસ્થાપ્ય પ્રેમ્ણા શોભન-આસને ।
ગાયત્ર્યાસ્તત્ર કર્તવ્યા સત્પ્રતિષ્ઠા વિધાનતઃ ॥ ૪૭
તદ્વિધાય તતો દીપ-ધૂપ-નૈવેદ્ય-ચન્દનૈઃ ।
નમસ્કૃત્યાક્ષતેનાપિ તસ્યાઃ પૂજનમાચરેત્ ॥ ૪૮॥

પૂજનાનન્તરં વિજ્ઞઃ ભક્ત્યા તજ્જપમારભેત્ ।
જપકાલે તુ મનઃ કાર્યં શ્રદ્ધાન્વિતમચઞ્ચલમ્ ॥ ૪૯॥

કાર્યતો યદિ ચોત્તિષ્ઠેન્મધ્ય એવ તતઃ પુનઃ ।
કર-પ્રક્ષાલનં કૃત્વા શુદ્ધૈરઙ્ગૈરુપાવિશેત્ ॥ ૫૦॥

આદ્યશક્તિર્વેદમાતા ગાયત્રી તુ મદન્તરે ।
શક્તિકલ્લોલસન્દોહાન્ જ્ઞાનજ્યોતિશ્ચ સન્તતમ્ ॥ ૫૧॥

ઉત્તરોત્તરમાકીર્ય પ્રેરયન્તિ વિરાજતે ।
ઇત્યેવાવિરતં ધ્યાયન્ ધ્યાનમગ્નસ્તુ તાં જપેત્ ॥ ૫૨॥

ચતુર્વિંશતિલક્ષાણાં સતતં તદુપાસકઃ ।

ગાયત્રીણામનુષ્ઠાનાદ્ગાયત્ર્યાઃ સિદ્ધિમાપ્નુતે ॥ ૫૩

સાધનાર્થે તુ ગાયત્ર્યા નિશ્છલેન હિ ચેતસા ।
વરણીયઃ સદાચાર્યઃ સાધકેન સુભાજનઃ ॥ ૫૪॥

લઘ્વનુષ્ઠાનતો વાપિ મહાનુષ્ઠાનતોઽથવા ।
સિદ્ધિં વિન્દતિ વૈ નૂનં સાધકઃ સાનુપાતિકામ્ ॥ ૫૫॥

એક એવ તુ સંસિદ્ધઃ ગાયત્રી મન્ત્ર આદિશત્ ।
સમસ્ત-લોકમન્ત્રાણાં કાર્યસિદ્ધેસ્તુ પૂરકઃ ॥ ૫૬॥

અનુષ્ઠાનાવસાને તુ અગ્નિહોત્રો વિધીયતામ્ ।
યથાશક્તિ તતો દાનં બ્રહ્મભોજસ્તતઃ ખલુ ॥ ૫૭॥

મહામન્ત્રસ્ય ચાપ્યસ્ય સ્થાને સ્થાને પદે પદે ।
ગૂઢાનન્તોપદેશાનાં રહસ્યં તત્ર વર્તતે ॥ ૫૮॥

યો દધાતિ નરશ્ચૈતાનુપદેશાંસ્તુ માનસે ।
જાયતે હ્યુભયં તસ્ય લોકમાનન્દસઙ્કુલમ્ ॥ ૫૯॥

સમગ્રામપિ સામગ્રીમનુષ્ઠાનસ્ય પૂજિતામ્ ।
સ્થાને પવિત્ર એવૈતાં કુત્રચિદ્ધિ વિસર્જયેત્ ॥ ૬૦॥

સત્પાત્રો યદિ વાચાર્યો ન ચેત્સંસ્થાપયેત્તદા ।
નારિકેલં શુચિં વૃત્વાચાર્યભાવેન ચાસને ॥ ૬૧॥

પ્રાયશ્ચિત્તં મતં શ્રેષ્ઠં ત્રુટીનાં પાપકર્મણામ્ ।
તપશ્ચર્યૈવ ગાયત્ર્યાઃ નાતોઽન્યદ્દૃશ્યતે ક્વચિત્ ॥ ૬૨॥

સેવ્યાઃ સ્વાત્મસમુદ્ધ્યર્થં પદાર્થાઃ સાત્ત્વિકાઃ સદા ।
રાજસાશ્ચ પ્રયોક્તવ્યાઃ મનોવાઞ્છિતપૂર્તયે ॥ ૬૩॥

પ્રાદુર્ભાવસ્તુ ભાવાનાં તામસાનાં વિજાયતે ।
તમોગુણાનામર્થાનાં સેવનાદિતિ નિશ્ચયઃ ॥ ૬૪॥

માલાસન-સમિધ્યજ્ઞ-સામગ્ર્યર્ચન-સઙ્ગ્રહઃ ।
ગુણત્રયાનુસારં હિ સર્વે વૈ દદતે ફલમ્ ॥ ૬૫॥

પ્રાદુર્ભવન્તિ વૈ સૂક્ષ્માશ્ચતુર્વિંશતિ શક્તયઃ ।
અક્ષરેભ્યસ્તુ ગાયત્ર્યા માનવાનાં હિ માનસે ॥ ૬૬॥

મુહૂર્તા યોગદોષા વા યેઽપ્યમઙ્ગલકારિણઃ ।

ભસ્મતાં યાન્તિ તે સર્વે ગાયત્ર્યાસ્તીવ્રતેજસા ॥ ૬૭॥

એતસ્માત્તુ જપાન્નૂનં ધ્યાનમગ્નેન ચેતસા ।
જાયતે ક્રમશશ્ચૈવ ષટ્ ચક્રાણાં તુ જાગૃતિઃ ॥ ૬૮॥

ષટ્ ચક્રાણિ યદૈતાનિ જાગૃતાનિ ભવન્તિ હિ ।
ષટ્ સિધ્દ્યોઽભિજાયન્તે ચક્રૈરેતૈર્નરસ્ય વૈ ॥ ૬૯॥

અગ્નિહોત્રં તુ ગાયત્રી મન્ત્રેણ વિધિવત્ કૃતમ્ ।
સર્વેષ્વવસરેષ્વેવ શુભમેવ મતં બુધૈઃ ॥ ૭૦॥

યદાવસ્થાસુ સ્યાલ્લોકે વિપન્નાસુ તદા તુ સઃ ।
મૌનં માનસિકં ચૈવ ગાયત્રી-જપમાચરેત્ ॥ ૭૧॥

તદનુષ્ઠાનકાલે તુ સ્વશક્તિં નિયમેજ્જનઃ ।
નિમ્નકર્મસુ તાઃ ધીમાન્ ન વ્યયેદ્ધિ કદાચન ॥ ૭૨
નૈવાનાવશ્યકં કાર્યમાત્મોદ્ધારસ્થિતેન ચ ।
આત્મશક્તેસ્તુ પ્રામાયાઃ યત્ર તત્ર પ્રદર્શનમ્ ॥ ૭૩॥

આહારે વ્યવહારે ચ મસ્તિષ્કેઽપિ તથૈવ હિ ।
સાત્ત્વિકેન સદા ભાવ્યં સાધકેન મનીષિણા ॥ ૭૪॥

કર્તવ્યધર્મતઃ કર્મ વિપરીતં તુ યદ્ભવેત્ ।
તત્સાધકસ્તુ પ્રજ્ઞાવાનાચરેન્ન કદાચન ॥ ૭૫॥

પૃષ્ઠતોઽસ્યાઃ સાધનાયા રાજતેઽતિતરં સદા ।
મનસ્વિસાધકાનાં હિ બહૂનાં સાધનાબલમ્ ॥ ૭૬॥

અલ્પીયસ્યા જગત્યેવં સાધનાયાસ્તુ સાધકઃ ।
ભગવત્યાશ્ચ ગાયત્ર્યાઃ કૃપાં પ્રાપ્નોત્યસંશયમ્ ॥ ૭૭॥

પ્રાણાયામે જપન્ લોકઃ ગાયત્રીં ધ્રુવમાપ્નુતે ।
નિગ્રહં મનસશ્ચૈવ ઇન્દ્રિયાણાં હિ સમ્પદામ્ ॥ ૭૮॥

મન્ત્રં વિભજ્ય ભાગેષુ ચતુર્ષુ સુબુધસ્તદા ।
રેચકં કુમ્ભકં બાહ્યં પૂરકં કુમ્ભકં ચરેત્ ॥ ૭૯॥

યથા પૂર્વસ્થિતઞ્ચૈવ ન દ્રવ્યં કાર્ય-સાધકમ્ ।
મહાસાધનતોઽપ્યસ્માન્નાજ્ઞો લાભં તથાપ્નુતે ॥ ૮૦॥

સાધકઃ કુરુતે યસ્તુ મન્ત્રશક્તેરપવ્યયઃ ।

તં વિનાશયતિ સૈવ સમૂલં નાત્ર સંશયઃ ॥ ૮૧॥

સતતં સાધનાભિર્યો યાતિ સાધકતાં નરઃ ।
સ્વપ્નાવસ્થાસુ જાયન્તે તસ્ય દિવ્યાનુભૂતયઃ ॥ ૮૨॥

સફલઃ સાધકો લોકે પ્રાપ્નુતેઽનુભવાન્ નવાન્ ।
વિચિત્રાન્ વિવિધાઁશ્ચૈવ સાધનાસિદ્ધ્યનન્તરમ્ ॥ ૮૩॥

ભિન્નાભિર્વિધિભિર્બુદ્ધ્યા ભિન્નાસુ કાર્યપઙ્ક્તિષુ ।
ગાયત્ર્યાઃ સિદ્ધમન્ત્રસ્ય પ્રયોગઃ ક્રિયતે બુધૈઃ ॥ ૮૪॥

ચતુર્વિંશતિવર્ણૈર્યા ગાયત્રી ગુમ્ફિતા શ્રુતૌ ।
રહસ્યમુક્તં તત્રાપિ દિવ્યૈઃ રહસ્યવાદિભિઃ ॥ ૮૫॥

રહસ્યમુપવીતસ્ય ગુહ્યાદ્ગુહ્યતરં હિ યત્ ।
અન્તર્હિતં તુ તત્સર્વં ગાયત્ર્યાં વિશ્વમાતરિ ॥ ૮૬॥

અયમેવ ગુરોર્મન્ત્રઃ યઃ સર્વોપરિ રાજતે ।
બિન્દૌ સિન્ધુરિવાસ્મિંસ્તુ જ્ઞાનવિજ્ઞાનમાશ્રિતમ્ ॥ ૮૭॥

આભ્યન્તરે તુ ગાયત્ર્યા અનેકે યોગસઞ્ચયાઃ ।
અન્તર્હિતા વિરાજન્તે કશ્ચિદત્ર ન સંશયઃ ॥ ૮૮॥

ધારયન્ હૃદિ ગાયત્રીં સાધકો ધૌતકિલ્બિષઃ ।
શક્તીરનુભવત્યગ્રાઃ સ્વસ્મિન્નેવ હ્યલૌકિકાઃ ॥ ૮૯॥

એતાદૃશ્યસ્તુ વાર્તા ભાસન્તેઽલ્પપ્રયાસતઃ ।
યાસ્તુ સાધારણો લોકો જ્ઞાતુમર્હતિ નૈવ હિ ॥ ૯૦॥

એતાદૃશ્યસ્તુ જાયન્તે તન્મનસ્યનુભૂતયઃ ।
યાદૃશ્યો ન હિ દૃશ્યન્તે માનવેષુ કદાચન ॥ ૯૧॥

પ્રસાદં બ્રહ્મજ્ઞાનસ્ય યેઽન્યેભ્યો વિતરન્ત્યપિ ।
આસાદયન્તિ તે નૂનં માનવાઃ પુણ્યમક્ષયમ્ ॥ ૯૨॥

ગાયત્રી સંહિતા હ્યેષા પરમાનન્દદાયિની ।
સર્વેષામેવ કષ્ટાનાં વારણાયાસ્ત્યલં ભુવિ ॥ ૯૩॥

શ્રદ્ધયા યે પઠન્ત્યેનાં ચિન્તયન્તિ ચ ચેતસા ।
આચરન્ત્યાનુકૂલ્યેન ભવબાધાં તરન્તિ તે ॥ ૯૪॥

Encoded and proofread by Sunder Hattangadi

*Gayatri Samhita*

pdf was typeset on August 26, 2024

Please send corrections to *sanskrit@cheerful.com*